
# Martand Mahatmay Pg1




1. ओं श्री गणेशाय नमो नमः || ओं श्री महामार्ताण्डनाथाय नमोनमः || ऋषय ऊचुः, सूत उवाच || शौनकाद्या म
2. हात्मानो मुनयो ब्रह्मवादिनः | नैमिषाख्ये महारण्ये तपस्तेपुर्मुमुक्षवः | एकधाते महात्मानः समा
3. जं चक्रुरुत्तमाः | धर्मार्थकाम मोक्षाणां उपायं ज्ञातुमिच्छवः | कानि क्षेत्राणि पुण्यानि कानि ती

## Martand Mahatmay Pg1

4. र्थानि भूतले | कथं वा भवति मुक्ति  तृणां पातकिनां कलौ | उपस्थितो दारुणोयः कलिकल्मष
5. वृद्धये | क्षणे क्षणे क्षीणमान धर्मपापिष्ठ वृद्धये | पाषाण्डा बहवो यत्र श्रुतिमार्ग प्रलोपकाः |
6. प्रादुर्भूता मतिर्नृणां विपरीतैव दृश्यते | न श्रद्धा श्रुति धर्मेषु न भक्तिः परमेश्वरे | लोभ प्रतिष्ठा
7. निष्ठानामधर्मैक प्रवृत्तये | एवं विलुलिते धर्मे सर्वे निरयगामिनः | एषामुद्धरणार्थाय क उपा
8. यस्तदुच्यताम् | इत्येव मुद्यतान्प्रष्टं मुनीनां वीक्ष्य शौनकः | प्राहविष्णुं नमस्कृत्य विनयावनतो मुनिः |
9. शौनक उवाच || शृणुध्वम् ऋषयः सर्वे प्रश्नमेतत्सुदुर्लभम् | मोक्षप्रदं मनुष्याणां कलौ कल्मषचेतसाम् |
10. सतामेव प्रवक्तव्यं गुह्याद्गुह्यमिदं यतः | त्यक्तं कामादि दोषाणां विष्णुभक्तिरतात्मनाम् | गुरुभक्तिर
11. तानां च वक्तव्यं मुक्ति साधनम् |ब्रह्मद्वेषरतानां तु दम्भाचार हतात्मनाम् | लोकानां बकवृत्ती
12. नां न ब्रूयादिदमुत्तमाः | क्षेत्राणामुत्तमं क्षेत्रमस्ति कश्मीरमण्डलम् | सिद्धपीठतयाख्यातं शिख
13. रे हिमवद्गिरेः | त्रैलोक्येर्भूतलं सारं तत्रापि हिमवद्गिरिः | तत्रापि मण्डितं तीर्थैः पुण्यं कश्मीरमण्ड
14. लम् | चत्वारिंशश्च पञ्चाथ तत्रस्थानानि शूलिनः | षष्ठिर्विष्णोस्तथा त्रीणि स्थानानि परमेष्ठिनः ||

CoreShardaTeam

15. द्वाविंशतिश्च दुर्गायाः सपुण्यानि च तत्र वै | येषां
दर्शनमात्रैण सद्यः पापक्षयो भवेत् | सिद्धिर्ध.......

Core Sharda Team